7

0975CH07

# सन्धिः

अस्माभिः पठितं यत् वर्णानां संयोजनेन शब्दरचना भवति। क्वचित् क्वचिद् वर्णसंयोजनेन वर्णरूपेषु परिवर्तनमपि जायते।

**यथा —**

| | | | |
|---|---|---|---|
| सूर्य + आतपे | = | सूर्यातपे | स्वर-सन्धिः |
| प्रत्यवदत् | = | प्रति + अवदत् | |
| तत् + अनन्तरम् | = | तदनन्तरम् | व्यञ्जन-सन्धिः |
| तस्मिन्नेव | = | तस्मिन् + एव | |
| तस्याः + च | = | तस्याश्च | विसर्ग-सन्धिः |
| नृपोऽवदत् | = | नृपः + अवदत् | |

**एतत् वर्णपरिवर्तनमेव सन्धिः, वरिवर्तितवर्णानां मूलरूपेषु पुनः आनयनं च सन्धिविच्छेदः। अधुना विस्तरेण जानीम : —**

**1. उदाहरणमनुसृत्य सन्धिं विच्छेदं वा कुरुत —**

**(क)** अ, आ + अ, आ = आ

i. सूर्य + आतपे = सूर्यातपे (अ+आ=आ)

ii. लोभ + आविष्टा = .................... (....................)

iii. आगतास्ति = .................... + .................... (....................)

iv. एव + अस्य = .................... (....................)

v. पूर्वार्द्धः .................... = .................... (....................)

**(ख)** इ, ई + इ, ई = ई

i. अति + इव = अतीव (इ+इ=ई)

ii. नदी + इयम् = .................... (....................)

iii. कपि + ईदृशः = .................... (....................)

© NCERT not to be republished

iv. लघ्वीति = ..................... + ..................... (.....................)

v. कपीन्द्रः = ..................... + ..................... (.....................)

**(ग)** उ, ऊ + उ, ऊ = ऊ

i. गुरु + उचितम् = गुरूचितम् (उ+उ=ऊ)

ii. भानु + उदयः = ..................... (.....................)

iii. लघूर्मिः ..................... + ..................... (.....................)

iv. भू + ऊर्ध्वम् = ..................... (.....................)

v. साधूपदेशः = ..................... + ..................... (.....................)

**(घ)** ऋ, ॠ + ऋ, ॠ = ॠ

i. पितृ + ऋणम् = पितॄणम् (ऋ+ऋ=ॠ)

ii. मातृ + ऋद्धिः = ..................... (.....................)

iii. भ्रातॄणम् ..................... + ..................... (.....................)

'अकः सवर्णे दीर्घः', इति सूत्रेण समान-स्वरवर्णयोः दीर्घादेशः भवति।
एषः 'दीर्घसन्धिः' इति कथ्यते।

**2. उदाहरणमनुसृत्य सन्धिं विच्छेदं वा कुरुत —**

**(क)** अ, आ + इ, ई = ए

i. अनेन + इति = अनेनेति (अ+इ=ए)

ii. यथा + इच्छया= ..................... (.....................)

iii. मातेव = ..................... + ..................... (.....................)

iv. लतेयम् = ..................... + ..................... (.....................)

**(ख)** अ, आ + उ, ऊ = ओ

i. वृक्षस्य + उपरि= वृक्षस्योपरि (अ+उ=ओ)

ii. सूर्योदयात् = ..................... + ..................... (.....................)

iii. घृत+ उत्पत्तिः = ..................... (.....................)

iv. मानवोचितम् = ..................... + ..................... (.....................)

v. गृह + उद्यानम् = ..................... (.....................)

**(ग)** अ, आ + ऋ, ॠ = अर्

i. महा + ऋषि: = महर्षि: (आ+ऋ=अर्)

ii. देवर्षि: = .................... + .................... (....................)

iii. वसन्त + ऋतु:= .................... (....................)

iv. वर्षर्तु: = .................... + .................... (....................)

> ‘आद् गुण:’ इति सूत्रेण अ-आ-वर्णयो:, इ,ई उ,ऊ/ऋ, ॠ वर्णाभ्यां सह मेलनेन क्रमश:-ए, ओ, अर् इति भवन्ति। एष: गुणसन्धि: इति कथ्यते।

**3. यथापेक्षितं सन्धिं विच्छेदं वा कुरुत —**

**(क)** अ, आ + ए, ऐ = ऐ

i. गत्वा + एव = गत्वैव (आ+ए=ऐ)

ii. एव + एनम् = .................... (....................)

iii. क्षणेनैव = .................... + .................... (....................)

iv. न + एतादृश: = .................... (....................)

v. महैरावत: = .................... + .................... (....................)

**(ख)** अ, आ + ओ, औ = औ

i. जल + ओघ: = जलौघ: (अ+ओ=औ)

ii. तव + औदार्यम्= .................... (....................)

iii. वनौषधि: = .................... + .................... (....................)

iv. महा + औत्सुक्येन= .................... (....................)

v. जनौघ: = .................... + .................... (....................)

> **‘वृद्धिरेचि’ इति सूत्रानुसारेण अ,आ वर्णयो: क्रमश: ए, ऐ/ओ, औ वर्णाभ्याम् सह मेलने जाते क्रमश: ‘ऐ’, ‘औ’ इति भवति। एष: ‘वृद्धिसन्धि:’ इति कथ्यते।**

© NCERT not to be republished







अधिकारः (अधि + ..........)

अधिगमः (अधि + ..........)

अधिकरणम् (.......... + करणम्)

अधिरोहति (.......... + रोहति)

आचारः (आ + ..........)

आधारः (आ + ..........)

आहारः (आ + ..........)

आगमनम् (आ + ..........)

**4. उदाहरणमनुसृत्य सन्धिं विच्छेदं वा कुरुत—**

**(क)** इ, ई + असमान-स्वरः= इ, ई स्थाने य् + स्वरः

i. प्रति + अवदत्= प्रत्यवदत् (इ+अ=य)

ii. यदि + अहम् = .......... (..........)

iii. तानि + एव = .......... (..........)

iv. पर्यावरणम् = .......... + .......... (..........)

v. इत्यवदत् = .......... + .......... (..........)

**(ख)** उ, ऊ + असमानः स्वरः= उ, ऊ स्थाने व् + स्वरः

i. खलु + अयम् = खल्वयम् (उ+अ=व)

ii. मधु + अरिः = .......... (..........)

iii. गुणेष्वेव = .......... (..........)

iv. विरमन्तु + एते = .......... + .......... (..........)

v. स्वागतम् = .......... + .......... (..........)

**(ग)** ऋ, ॠ + असमान-स्वरः= ऋ स्थाने र् + स्वरः

i. पितृ+ आदेशः= पित्रादेशः (ऋ+आ=रा)

© NCERT not to be republished



Rationalised 2023-24

ii. मात्राज्ञा = ........................ + ........................ (........................)

iii. भ्रातृ + इच्छा = ........................ (........................)

iv. कर्तृ + उपदेश: = ........................ (........................)

v. पित्रनुमति: = ........................ + ........................ (........................)

**'इको यणचि' सूत्रानुसारम् इ, ई/उ, ऊ/ ऋ, ॠ स्वराणाम् असमानस्वरेण सह मेलनेन इ, ई/उ,ऊ/ऋ, ॠ वर्णानां स्थाने क्रमश: य्, व्, र् इति भवन्ति, परवर्ती स्वर: च एतै: सह मात्रारूपेण प्रयुज्यते।**

**5. उदाहरणमनुसृत्य सन्धिं विच्छेदं वा कुरुत —**

**(क)** म् + व्यञ्जनवर्ण: = म् स्थाने अनुस्वार:
म् + स्वर: = म् वर्णे स्वरस्य संयोग:

i. त्वम् + यासि = त्वं यासि (संधि:)

ii. अहम् + इच्छामि = ........................ (........................)

iii. किम्+ कथयति = ........................ (........................)

iv. अयम् + राजा = ........................ (........................)

v. माम् + मुञ्च = ........................ (........................)

vi. कथमागत: = ........................ + ........................ (........................)

vii. अयम् +राजा = ........................ (........................)

viii. हर्तुम् +इच्छति = ........................ (........................)

ix. सन्ध्याम् + यावत् = ........................ (........................)

'मोऽनुस्वार:' इति सूत्रानुसारं 'म्' इति वर्णस्य पश्चात् यदि कोऽपि व्यञ्जनवर्ण: भवति तर्हि 'म्' वर्णस्य स्थाने अनुस्वार: भवति।



Rationalised 2023-24

© NCERT not to be republished

## अभ्यासः

**1. प्रदत्त-पदेषु सन्धिं विच्छेदं वा कुरुत —**

i. हिताहितम् = ................................ + ................................
ii. पश्चिमोत्तरम् = ................................ + ................................
iii. वृथा + अटनम् = ................................
iv. इति + उभौ = ................................
v. नमाम्येनम् = ................................ + ................................
vi. वृकोदरेण = ................................ + ................................
vii. राजमार्गेण + एव= ................................
viii. इहागतः = ................................ + ................................
ix. पूर्व + इतरम् = ................................
x. वदतीति = ................................ + ................................
xi. तव + औषधम् = ................................
xii. राजर्षिः = ................................ + ................................
xiii. अत्रान्तरम् = ................................ + ................................
xiv. अहम् + गच्छामि = ................................
xv. खलु + एषः = ................................
xvi. साधूक्तम् = ................................ + ................................
xvii. मातृ + ऋणम् = ................................

© NCERT not to be republished